श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेवराजगुरुवर्यानुगृहीता

# ॥ उत्तरदिनचर्या ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ उत्तरदिनचर्या ॥

अथ गोष्ठीं गरिष्ठानामधिष्ठाय सुमेधसाम्।
वाक्यालङ्कृतिवाक्यानां व्याख्यातारं नमामि तम्॥ 1 ॥

सायन्तनं ततः कृत्वा सम्यगाराधनं हरेः।
स्वैरालापैः शुभैश्श्रोतॄन्नन्दयन्तं नमामि तम्॥ 2 ॥

ततः कनकपर्यङ्के तरुणद्युमणिद्युतौ।
विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वले॥ 3 ॥

समग्रसौरभोद्गारनिरन्तरदिगन्तरे।
सोपधाने सुखासीनं सुकुमारे वरासने॥ 4 ॥

उन्मीलत्पद्मगर्भद्युतितलमुपरि क्षीरसङ्घातगौरं
राकाचन्द्रप्रकाशप्रचुरनखमणिद्योतविद्योतमानम्।
अङ्गुल्यग्रेषु किञ्चिन्नतमतिमृदुलं रम्यजामातृयोगी
दिव्यं त्वत्पादयुग्मं दिशतु शिरसि मे देशिकेन्द्रो दयालुः॥ 5 ॥

त्वं मे बन्धुस्त्वमसि जनकस्त्वं सखा देशिकस्त्वं
विद्या वृत्तं सुकृतमतुलं वित्तमप्युत्तमं त्वम्।
आत्मा शेषी भवसि भगवन्नान्तरश्शासिता त्वं
यद्वा सर्वं वरवरमुने ! यद्यदात्मानुरूपम्॥ 6 ॥

अग्रे पश्चादुपरि परितो भूतलं पार्श्वतो मे
मौळौ वक्त्रे वपुषि सकले मानसाम्भोरुहे च।

दर्शंदर्शं वरवरमुने ! दिव्यमङ्घ्रिद्वयं ते
नित्यं मज्जन्नमृतजलधौ निस्तरेयं भवाब्धिम् ॥ 7 ॥

कर्माधीने वपुषि कुमतिः कल्पयन्नात्मभावं
दुःखे मग्नः किमिति सुचिरं दूयते जन्तुरेषः।
सर्वं त्यक्त्वा वरवरमुने ! सम्प्रति त्वत्प्रसादात्
दिव्यं प्राप्तुं तव पदयुगं देहि मे सुप्रभातम् ॥ 8 ॥

या या वृत्तिर्मनसि मम सा जायतां संस्मृतिस्ते
यो यो जल्पस्स भवतु विभो ! नामसङ्कीर्तनं ते।
या या चेष्टा वपुषि भगवन् ! सा भवेद्वन्दनं ते
सर्वं भूयाद्वरवरमुने ! सम्यगाराधनं ते ॥ 9 ॥

अपगतमदमानैरन्तिमोपायनिष्ठैः
अधिगतपरमार्थैरर्थकामानपेक्षैः।
निखिलजनसुहृद्भिर्निर्जितक्रोधलोभैः
वरवरमुनिभृत्यैरस्तु मे नित्ययोगः ॥ 10 ॥

इति स्तुतिनिबन्धेन सूचितस्वमनीषितान्।
भृत्यान् प्रेमार्द्रया दृष्ट्या सिञ्चन्तं चिन्तयामि तम् ॥ 11 ॥

अथ भृत्याननुज्ञाप्य कृत्वा चेतश्शुभाश्रये।
शयनीयं परिष्कृत्य शयानं संस्मरामि तम् ॥ 12 ॥

दिनचर्यामिमां दिव्यां रम्यजामातृयोगिनः।
भक्त्या नित्यमनुध्यायन् प्राप्नोति परमं पदम् ॥ 13 ॥

॥ इति उत्तरदिनचर्या समाप्ता ॥